संस्कृत

स्मार्त

क्र.29

स्मार्त.

संतानगोपालप्रयोग.

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

श्रीगणेशायनमः॥संतानगोपालप्रयोगः॥अस्यश्रीसंतानगोपालमंत्रस्यनारदऋषिः॥अ
नुष्टुप्छंदः।कंबीजं।ईंशक्तिः।लंकिलकं।चिरंजीवितपुत्रप्राप्त्यर्थेजपेवि०क्लांअंगुष्ठाभ्यां०एवंहृदया
दि।भूर्भुवस्वरोमितिदिग्बंधः।ध्यानं।स्वांकेसन्मुखपुमान्।देवकीसुतगोविंदवासुदेवजगत्पते॥देहि
मेतनयंकृष्णत्वामहंशरणंगतः॥पूर्वोच्चारितएवंगुणविशेषणविशिष्टायांपुण्यतिथौममसमस्तका
मनासिध्यर्थंचिरंजीवितसुपुत्रावाप्त्यर्थंसंतानगोपालमंत्रन्यासध्यानपूर्वकंकलशस्थापनंपीठाव
रणमुख्यदेवतापूजनजपमहंकरिष्ये।अथोद्दीपारिकलशस्थापनं।महीद्यौरितिभूमिंप्रार्थ्य।आ
कलशेष्वितिकलशपूजनं।तस्योपरिपीठस्थापनं।यंत्रोद्धारः।षट्कोणवृत्तंवसुपत्रवृत्तंत्रिरेखंजंभ
मिगृहंचयंत्रं।मध्येइष्टदेवतांषट्कोणेषु।निवेशमातृ।इंद्रादीन्वसुपत्रेषुवज्रादींश्चततःक्रमात्।
षोडशोपचारैश्चतन्नाममनापूजयत्सुधीः।अस्यश्रीसंतानगोपालमंत्रस्यनारदऋषयेनमःशिरसि।
अनुष्टुप्छंदसेनमःमुखे।श्रीसंतानगोपालपरमात्मादेवतायैहृदये।गंबीजंगुह्ये।देहिमेतनयंकृष्णेतिश
क्तिःपादयोः।वासुदेवजगत्पतेतिकीलकंसर्वांगे।केचिन्मतेकंबीजंईंशक्तिः।लीं।कीलकं।रामराजषट्दी

सं॰गो॰

र्घेणन्यासमितिमतं। सुपुत्रप्राप्त्यर्थंजपेवि॰ अथन्यासः। देवताबीजेनषड्दीर्घेणन्यासः। देवकीसुतेति
१ अं॰ गोविंदेति तर्ज॰ वासुदेवेति मध्य॰ देहिमेतनयंकृष्णेतिअनामि॰ त्वामहंशरणंगतः कनिष्ठिका॰ दे
वकीसुतेतिशरणंगतः करतल॰ एवंहृदयादि। देवकीसुतेतिशिरसि। गोविंदेतिललाटे। वासुदेवेतिमु
(2) खे। जगत्पतेतिहृदये। देहीतिकुक्षौ। मेनेतिनाभौ। तनयमितिकट्यां। कृष्णेत्यूर्वोः। त्वामहमितिजान्वोः। श
रणंगतः पादयोः। ॐ चक्रायस्वाहा अंगुष्ठाभ्यां॰ विचक्रायस्वाहा तर्जनीभ्यां॰ सुचक्रायस्वाहा मध्यमा॰
त्रैलोक्यरक्षणचक्रायस्वाहा अनामि॰ असुरांतकचक्रायस्वाहा कनिष्ठिकाभ्यांनमः। सर्वमोहनचक्रा
यस्वाहा करतलकरपृष्ठाभ्यांनमः। एवंहृदयादि। ॐ चक्रायस्वाहा हृदयाय॰ विचक्रा॰ शिरसे॰ सुचक्रा॰
शिखायै॰ त्रैलोक्यरक्षणच॰ कवचाय॰ असुरांतकच॰ नेत्रत्र॰॥ ॥श्री॰ संतानगोपालप्रयोगः। अस्य
श्रीसंतानगोपालमंत्रस्य नारदऋषिः। अनुष्टुप्छंदः। कं बीजं। ईं शक्तिः। लं कीलकं। चिरंजीवितपुत्रप्राप्त्यर्थे
जपेविनियोगः। क्लां अंगुष्ठाभ्यां॰ एवंहृदयादि। भूर्भुवःस्वरोमितिदिग्बंधः। ध्यानं। स्वांकेसन्मुखसंनिषण्ण
ममलेरकांभुजेबालकंमाणिक्योज्वलमाल्यभूषणलसत्प्रोतसहेमस्रकीं॥ प्रेम्णालिंग्यमुहुर्मुहुः सुखशा १
त्याभावितंस्वात्मनाध्यायेसुत्रतयापुराणपुरुषंपुत्राभिलाषीपुमान्॥ शंखचक्रधरंदेवंश्यामवर्णंचतुर्भु

(2A) भुजं॥ सर्वाभरणसंदीप्तं पीतवाससमच्युतं॥ मयूरपिच्छसंसक्तं विद्युत्तेजोपबृंहितं॥ समर्पयंतं विप्रायनष्टाना
नीयबालकान्॥ करुणामृतसंपूर्णामिष्टैकनिलयंस्वजान्॥ इतिध्यात्वा॥ मानसोपचारैः संपूज्य। लं पृथिव्या
त्मने गंधतन्मात्रप्रकृत्यानंदात्मने श्रीसंतानगोपालाय गंधं कल्पयामि नमः। हं आकाशात्मने शब्दतन्मात्र
प्रकृत्यानंदात्मने श्री० पुष्पं०। यं वाय्वात्मने स्पर्शतन्मात्रप्रकृत्यानंदात्मने श्री० धूपं० रं तेजात्मने रूपतन्मात्र
प्रकृत्यानंदात्मने श्री० दीपं० वं आत्मतत्वात्मने रसतन्मात्रप्रकृत्यानंदात्मने श्री० अमृतं नैवेद्यं कल्पयामि। सः
सर्वात्मने सर्वतन्मात्रप्रकृत्यानंदात्मने श्री० सर्वोपचारान् कल्पयामि। अथ पीठपूजा। ॐ नमो भगवते विष्ण
वे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगपद्मपीठात्मने० इत्यक्षतान्निक्षिप्य पीठमध्ये। आं आधारशक्त्यै०
कूर्माय० वराहाय० अनंताय० पद्मनाभाय० पूर्वे द्वारश्रियै० धर्माय० दक्षिणे। द्वारश्रियै० अर्थाय० पश्चि
मे। द्वारश्रियै० कामाय० उत्तरे। द्वारश्रियै० मोक्षाय० आग्नेय्यां। अधर्माय० नैर्ऋत्यां। अनर्थाय० वायव्यां॥
अकामाय० ईशान्यां। अमोक्षाय० मध्ये सत्वाय० रजसे० तमसे० आत्मने० अंतरात्मने० परमात्मने० ज्ञा
नात्मने० मध्ये इष्टदेवताय० षट्कोणेषु। आग्नेय्यां। हृदयाय० नैर्ऋत्यां। शिरसि। वायव्यां। शिखायैवष
ट्। ईशान्यां। कवचायहुं। पुरतः नेत्रत्रयायवौषट्। पश्चतः अस्त्रायफट्। अष्टदले। इंद्राय० अग्नये० यमाय०

नैर्ऋतये॰ वरुणाय॰ वायवे॰ सोमाय॰ ईशानाय॰ ऊर्ध्वधात्रे॰ अधरेशेषाय॰ अवांतरेसवित्रे॰ पुनस्तथैवा व
ज्राय॰ शक्तये॰ दंडाय॰ खड्गाय॰ पाशाय॰ अंकुशाय॰ गदायै॰ त्रिशूलाय॰ अष्टदिक्षु। विमलशक्त्यै॰ उत्तरे
२ शेषाय॰ क्रियाशक्तये॰ योगशक्तये॰ प्रह्लादशक्तये॰ प्रकृतिशक्तये॰ शंतुश॰ ईशानश॰ अनुग्रहशक्त्यै॰
मध्ये। प्राग्धाम्नेन॰ दक्षिणे। सुधाम्ने॰ उत्तरे। वसुधाम्ने॰ कोणेषु। किंकिणीभ्योन॰ अक्राय॰ विचक्रा॰ सुच
(3) क्राय॰ त्रैलोक्यरक्षणच॰ असुरांतकच॰ सर्वमोहनेच॰ मध्ये। वासुदेवाय॰ वामे। संकर्षणाय॰ दक्षिणे अनि
रुद्धाय॰ अग्रेगरुडाय॰ पूर्वे मंदाराय॰ पश्चिमे पारिजाताय॰ दक्षिणे संतानाय॰ उत्तरे कल्पद्रुमाय॰ मध्ये
हरिचंदनाय॰ पीठमंत्रेण मध्ये पुष्पांजलिं दत्वा। रुक्मिण्यै॰ सत्यभामायै॰ जांबुवत्यै॰ नाग्निजित्यै॰ मि
त्रविंदायै॰ कालिंद्यै॰ लक्ष्मणायै॰ सुशीलायै॰ पूर्वे। शांत्यै॰ दक्षिणे श्रियै॰ पश्चिमे सरस्वत्यै॰ उत्तरे रत्यै॰
मूलमंत्रेण षोडशोपचारैः पूजां कुर्यात्। अस्य चतुर्लक्ष पुरश्चरणं। पायसाज्येन दशांशेन होमः। दश
म्यामपरात्रौ च शुक्लपक्षे र्चयेच्छौरिं। पुत्रार्थं स्वलिकेन्यस्य तत्र स्कंदविष्णुमर्चयेत्। वंध्यापुत्रप्राप्त्यर्थं
मनुस्तस्य यथाविधिलक्षपुरश्चरणं।। इतिश्रीहरिवंशे संतानगोपालपद्धतिः समाप्ता।। इदं पु
स्तकं गोरथले इस्कपनाम सदाशिवनाके लिखितं २

# मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com